CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.13
Coll. No. 624

Title Sikṣā, Jyoti, Chhanda
& Nighaṇṭu

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 624 Subject: Vedic lit.

Title: Śikṣā, Jyoti, Chhanda, Nighaṇṭu.

Author: ______ Scribe: Dave Śaṅkara

Date of the work: — Date of the Ms.: V. S. 1929

Place of the work: ______ Place of the Ms.: —

Size: 10.5" by 4.8" Extent: 19 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: —

॥ ६ ॥ श्री ... आत्रवाडि जिवनरामभ्राता हस्तनी पोथी ग्रंथि पान अधाए

पी॥ कस्तूरीकर

॥श्रीगणेशायनमः॥ अथशिक्षांप्रवक्ष्यामिपाणिनीयंमतंयथा॥शास्त्रानुपूर्वंतद्विद्याद्यथोक्तंलोकवेदयो
ः॥प्रसिद्धमपिशब्दार्थमविज्ञातमबुद्धिभिः॥पुनर्व्यक्तीकरिष्यामिवाचउच्चारणेविधिं॥त्रिषष्टिश्चतुःषष्टिर्वा
वर्णाःसंभवतोमताः॥प्राकृतेसंस्कृतेचापिस्वयंप्रोक्ताःस्वयंभुवा॥स्वराविंशतिरेकश्चस्पर्शानांपंचविंशतिः॥
यादयश्चस्मृताह्यष्टौचत्वारश्चयमास्मृताः॥अनुस्वारोविसर्गश्चᳲपौचापिपराश्रयौ॥दुस्पृष्टश्चेतिविज्ञे
योऌकारःप्लुतएवच॥यथासौराष्ट्रिकानारीअराँइत्यभिभाषते॥एवंरंगंविजानीयात्खेअराँइवखेदया॥
हकारंपंचमैर्युक्तमंतस्थाभिश्चसंयुतं॥औरस्यंतंविजानीयात्कंठ्यमाहुरसंयुतं॥४॥ आत्माबुद्ध्यासम
र्थ्यार्थान्मनोयुंक्तेविवक्षया॥मनःकायाग्निमाहंतिसप्रेरयतिमारुतं॥मारुतस्तूरसिचरन्मंद्रंजनयतिस्व
रं॥प्रातःसवनयोगंतंछंदोगायत्रमाश्रितं॥कंठेमाध्यंदिनयुगंमध्यमंत्रैष्टुभानुगं॥तारंतार्तीयसवनंशी

शी

र्षण्यंजागतानुगं॥सोदीर्णोमूर्ध्न्यभिहतोवक्त्रमापद्यमारुतः॥वर्णान्जनयतेतेषांविभागःपंचधास्मृतः॥स्वरतः
कालतःस्थानात्प्रयत्नानुप्रदानतः॥इतिवर्णविदःप्राहुर्निपुणंतंनिबोधत॥अष्टौस्थानानिवर्णानामुरःकं
ठःशिरस्तथा॥जिह्वामूलंचदंताश्चनासिकोष्ठौचतालुच॥उदात्तेनिषादगांधारावनुदात्तऋषभधैवतौ॥स्व
रितप्रभवाह्येतेषड्जपंचममध्यमाः॥५॥ ओभावश्चविवृत्तिश्चशषसारेफएवच॥जिह्वामूलमुपध्माचगतिर
ष्टविधोष्मणः॥यद्योभावप्रसंधानमुकारादिपरंपदं॥स्वरांतंतादृशंविद्याद्यदन्यद्व्यक्तमूष्मणः॥कुतीर्थादा
गतंदग्धमपवर्णंचभक्षितं॥नतस्यपरिमोक्षोस्तिपापाहेरिवकिल्बिषात्॥सुतीर्थादागतंव्यक्तंस्वाम्नायंसु
व्यवस्थितं॥सुस्वरेणसुवक्त्रेणप्रयुक्तंब्रह्मराजते॥नकरालोनलंबोष्ठोनाव्यक्तोनानुनासिकः॥गद्गदो
बद्धजिह्वश्चप्रयोगान्वक्तुमर्हति॥यथाव्याघ्रीहरेत्पुत्रान्दंष्ट्राभिर्नचपीडयेत्॥भीतापतनभेदाभ्यांतद्व

स्मान्प्रयोजयेत्॥ एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः॥ सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते॥ अभ्या
सार्थं तु तान्हन्ति प्रयोगार्थं तु मध्यमौ॥ शिष्याणामुपदेशार्थं कुर्याद्धन्ति विलंबिताम्॥ उदात्तश्चानुदात्तश्च
स्वरितश्च स्वरास्त्रयः॥ ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि॥ कंठ्यावहाविचुयशास्तालव्या ओष्ठजावु
पूपध्मा स्युर्मूर्द्धन्या ऋटुरषा दंत्या लृतुलसाः स्मृताः॥ जिह्वामूले तु कुः प्रोक्तो दंत्योष्ठ्यो वः स्मृतो बुधैः॥ ए ऐ तु २
कंठ्यतालव्या ओ औ कंठोष्ठजौ स्मृतौ॥ अर्द्धमात्रा तु कंठ्यस्य एकारैकारयोर्भवेत्॥ ओकारौकारयोर्मात्रा
एविवृतसंवृतौ॥ उपध्मानीय ऊष्मा च जिह्वामूलीय नासिके॥ अयोगवाहा विज्ञेया आश्रयस्थानभागि
नः॥ अलाबुवीणानिर्घोषो दंतमूल्यः स्वरान्परः॥ अनुस्वारस्तु कर्तव्यो नित्यं ह्रोः शषसेषु च॥ जझणां च ॥२॥
स्वराणां च विवृतं करणं स्मृतं॥ तेभ्योपि विवृतावेतौ ताभ्यामैतौ ततोपि च॥ ४॥ अचोस्पृष्टा यणस्त्वीषन्नेम

स्पृष्टाः शलः स्मृताः॥ शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः॥ यमोऽनुनासिका न ह्रौ नादिनो हझषः स्मृताः॥
ईषन्नादा यणो जश्च श्वासिनस्तु खफादयः॥ ईषच्छ्वासांश्चरो विद्याद्गोर्धामैतत्प्रचक्षते॥ शंकरः शांकरीं प्रादा
द्दाक्षीपुत्राय धीमते॥ दाक्षीपुत्र पाणिनेयो येनेदं व्याहृतं भुवि॥ रत्नभूतमिदं शास्त्रं पृथिव्यां संप्रकाशि
तं॥ येनाक्षरसमाम्नायमधिगम्य महेश्वरात्॥ कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥ त्रिनयनमुखनि
सृतामिमां य इह पठेत्प्रयतः सदा द्विजः॥ स भवति धनधान्यपशुपुत्रकीर्त्तिमान्सुखमतुलं च समश्नुते दिवि
ति दिवीति॥ ५॥ इति शिक्षा समाप्ता॥ ॥ ॥ पंचसंवत्सरमयं युगाध्यक्षं प्रजापतिं॥ दिनर्त्वयनमासांगं प्रण
म्य शिरसा शुचिः॥ १॥ ज्योतिषामयनं पुण्यं प्रवक्ष्याम्यनुपूर्वशः॥ संमतं ब्राह्मणेन्द्राणां यज्ञकालार्थसिद्ध
ये॥ २॥ वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्व्या विहिताश्च यज्ञाः॥ तस्मादिदं कालविधानशास्त्रं यो ज्यो

तिषंवेदसवेदयज्ञं।३।यथाशिखामयूराणांनागानांमणयोयथा।तद्वद्वेदांगशास्त्राणांगणितंमूर्द्धनिस्थि
तं।४।येबृहस्पतिनाभुक्तामीनात्प्रभृतिराशयः।तेहृताःपंचभिर्भूतायःशेषःसपरिग्रहः।५।माघशुक्ल
प्रपन्नस्यपौषकृष्णसमापिनः।युगस्यपंचवर्षस्यकालज्ञानंप्रचक्षते।६।स्वराक्रमेतेसोमार्कौयदासा
कंसवासवौ।स्यात्तदादियुगंमाघस्तपःशुक्लोयनंह्युदक्।७।प्रपद्येतेश्रविष्ठादौसूर्याचंद्रमसावुदक्।
सार्पार्द्धेदक्षिणार्कस्तुमाघश्रावणयोःसदा।८।घर्मवृद्धिरपांप्रस्थःक्षपाह्रासउदग्गतौ।दक्षिणे
तौविपर्यासःषण्मुहूर्त्ययनेनतु।९।प्रथमंसप्तमंचाहुरयनाद्यंत्रयोदशं।चतुर्थंदशमंचैवद्वियुग्माद्यं
बहुलेप्यृतौ।१०।वसुस्त्वष्टाभवोजश्चमित्रःसर्पाश्विनौजलं।धाताकश्चायनाद्याःस्युरर्द्धपंचमभस्त्वृतुः।११। २
एकांतरेह्निमासेचपूर्वान्कृत्वादिरुत्तरः।अर्द्धयोःपंचपर्वाणिभृदुपंचदशाष्टमौ।द्युहेयंपर्वचेत्पादपा

दक्षिंशत्तुसैकिका।नागान्मनापहृत्यांशांनिर्दिशेछोधिकोयदि।निरेकंद्वादशाभ्यस्तंद्विगुणंगतसंयुतं।षष्ट्याष
ष्ट्यायुतंद्वाभ्यांपर्वणांराशिरुच्यते।२।स्फकापादोर्द्धंत्रिपद्यायात्त्रिद्व्येकेह्नःकृतेस्थितिं।साम्येनेंदोस्तृणेनषुपं
चकाःपर्वसंमिताः।नांशास्फरष्टकाःकार्याःपक्षाद्वादशकोद्धृताः।एकादशगुणश्चोनःशुक्लेर्द्धंचैंदवायदि
दिनवकेरुकृतोंशास्याद्भनःसप्तगुणोनवेत्।भावापस्त्वयुजेर्द्धंस्यात्पौजस्तेस्तंगतेपरं।जावाद्यंशैःसमंवि
द्यात्पूर्वार्द्धेपर्वसूत्तरं।नादानंस्याचतुर्द्दशैःस्याद्भिनागेन्योधिकोयदि।जौद्राःगःखास्येहिरोषाचित्मूषण्यः
सुमाधाणाःरेसृगाम्त्वापोजःकृष्ट्यहज्येष्ठाइत्यृक्षालिंगैः।कार्यांनांशाष्टकास्त्वानेकलाएकोनविंशतिः।।
ऊनस्थानेद्विसप्तनिमुद्धपेद्यक्षसंनवेत्।।३।।तिथिमेकादशाभ्यस्तांपर्वांशसमन्वितां।विभज्यनसम्
नतिथिनक्षत्रमादिशेत्।याःपर्वभादानकलास्तासुसप्तगुणांतिथिं।उक्तास्तासांविजानीयात्तिथिभं।

निकाः कलाः ॥ अतीतपर्वभागेभ्यः शोधयेद्द्विगुणां तिथिं ॥ तेषु मण्डलभागेषु तिथिनिष्ठां गतो रविः ॥ विषुवन्तं
द्विरभ्यस्तं रूपोनं षड्गुणीकृतं ॥ पक्षा यदर्धं पक्षाणां तिथिः स विषुवान्स्मृतः ॥ पक्षानि पंचाशदपां कृत्वा
नि तदा षट्कं क्षेणमतः प्रमेयं ॥ त्रिनिर्विहीनं अउ वेष्टु कार्यं तच्चाउडिकाया ष्टुनवेत्स्यमाणं ॥ एकादशभिरभ्य
न्यस्य पर्वाणि नवभिस्तिथिं ॥ युगलब्धं सपर्वस्याद्वर्तमानार्कनक्षमात् ॥ ४ ॥ सूर्यर्क्षभागान्नवभिर्विभ
ज्य शेषं द्विरभ्यस्तं दिनोपयुक्तिः ॥ तिथियुता भुक्तिर्दिनेषु कालो योगो दिनैकादशकेन तद्भः ॥ त्रिंशीत्यहा
षाद्विवसांशभागस्तु दशाश्वाथपनीय तित्रंभाद्धिके चापि गते परांशो द्वावुत्तमेतं नव कैरवेक्ष्य ॥ त्रिं
शत्यकां सषट्षष्टिरब्दः षड्भर्तवोयने ॥ मासा द्वादश सूर्यास्य करेतत्पंचगुणं युगं ॥ उदयावासवस्य स्युर्दि
नराशिस्तु पंचकः ॥ सषद्विषष्टिहीनं स्याद्विंशत्या चैकया स्तृणां ॥ पंचत्रिंशं शतं पौष्णमेकोनमयनान्यृषीं

पर्वसांख्याय तु षष्टीकार्धानां देविकाः कलाः ॥ भायनेन्दुस्त्रिमासानां षष्टिश्चैकाद्विसप्तिका ॥ द्वित्रिंशद्भावनः मा
र्दः सूर्यस्त्रीणां सपर्वणः ॥ ५ ॥ अग्निः प्रजापतिः सोमो रुद्रोदितिर्बृहस्पतिः ॥ सर्पाश्च पितरश्चैव भगश्चैवार्य
मापि च ॥ सविता त्वष्टाथ वायुश्चेन्द्राग्नी मित्र एव च ॥ इन्द्रो निर्ऋतिरापो विश्वेदेवास्तथैव च ॥ ब्रह्मा विष्णुर्वसू
वो वरुणोऽज एकपान्नथैव च ॥ अहिर्बुध्न्यस्तथा पूषाश्विनौ यम एव च ॥ नक्षत्रदेवता ह्येता एताभिर्यज्ञ
कर्माणि ॥ यजमानस्य शास्त्रज्ञैर्नाम नक्षत्रजं स्मृतं ॥ उग्राण्यार्द्रा च चित्रा च विशाखा श्रवणाश्वयुक् ॥
क्रूराणि तु मघा स्वाति ज्येष्ठा मूलं यमस्य यत् ॥ ६ ॥ द्यूनं द्विषष्टिभागेन हेयं सौम्यस्य पार्वणं ॥ यत्कृतावु
पजायेत मध्येन्ते चापि सा तिथिः ॥ कलादश च विंशा स्याद्द्विमुहूर्तस्य नाडिके ॥ द्वित्रिंशत्कलानां तु ष
ट्शती त्र्यधिकं भवेत् ॥ ससप्तकं भयुक्सोमः सूर्यो द्यूनि त्रयोदश ॥ नवमानि तु पंचाहः काष्ठा पञ्चा दृ

त्तवेत्।यदुत्तरस्यायनतोगतंस्यात्षष्ठंतथादक्षिणतोयनस्यान्तदेवषष्ठ्याद्विगुणो।विषुवत्कंसकृद्दशस्य
द्विवसप्रमाणो।यदर्द्धंदिननागानांसदापर्वणिपर्व।।णि।।चक्रेचोपंचतद्विद्याःसंख्यायसरूपर्वणो।।इ
त्येपायसम्बद्धेशोत्तरयोश्चक्रा।।चक्रेच्यर्येत्।ज्ञेयंराशिंगतांच्यस्तांत्विनजेज्ञानमांराशिनो।।इयेवंमा
मासंवर्षाणांशुक्लनैंद्रियपर्वणो।।दिनर्द्धयनमासांगंव्याख्यातंलगतोब्रवीत्।सोमसूर्यस्त्रिचरितं
विद्वान्वेदविदश्नुते।सोमसूर्यस्त्रिचरितंलोकंलोकेचसंततंलोकंलोकेनसंततमिति।।७।।इतिज्यो ५५॥
तिषंसमाप्तं।। ।।ग।।भमयरसतजभनगैःसंमितंभ्रमतिवाङ्मयंजगतियस्यसजयतिपिंगल
नागःशिवप्रसादाद्विशुद्धमतिः।।त्रिगुरुंविद्धिमकारंलघ्वादिसमन्वितंयकाराख्यं।लघुमध्यमे
चरेफंसकारमंतेगुरुनिबद्धं।लघ्वंत्यंहितकारंजकारमुभयोर्लघुंविजानीयात्।आदिगुरुंचभ

कारंनकारमिहपिंगलेत्रिलघुं।लघुंदीर्घंसंयोगपरंतथाप्लुतंव्यंजनांतमूर्ध्भाणं।सानुस्वारंचगुरुंक्वचि
दवसानेपिलघ्वंत्यं।त्रिविरामंदशवर्णंसंधिपरमात्रस्तुवाचपिंगलःस्वत्वं।छंदोवर्गपदार्थःप्रत्ययहेतोःशा
स्त्रादौ।।१।।धीश्रीस्त्रीमूः।वरासायः।काःगुहाः।वसुधाःसः।मानेक्कत्।कदासजः।किंवदत्।नहसत्।शृ
गंतेः।आदिपरः।हः।लोमः।ऽगौ।अष्टौवसवइति।।२।।छंदः।गायत्री।।दैव्येकं।आसुरीपंचदशः।प्राजाप
त्याष्टौ।यजुषांषट्।साम्नांद्विः।ऋचांत्रिः।द्वौद्वौसाम्नांवर्द्धेत।त्रीस्त्रीन्दृचां।चतुरश्चतुरःप्राजापत्यायाः।
एकैकंशेषाः।जह्यादासुरी।नान्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यः।तिस्रस्तिस्रःसमनाम्न्यएकैकः
ब्राह्म्यः।आर्ष्यंयजुषामार्ष्यइति।।३।।पादः।इयादिपूरणः।गायत्र्यावसवः।जगत्याआदित्याः।विराजोदि
शः।त्रिष्टुभोरुद्राः।एकद्वित्रिचतुष्पादुक्तपादं।आद्यंचतुष्पाद्दतुभिः।क्वचित्त्रिपाद्दषिभिः।सापादनिवृ

ता॥ अष्टौ सप्त षड्ढ इति त्रिर्निवृत्॥ एषैव विपरीता वर्धमाना॥ षट्कः सप्तकयोर्मध्य इत्यति पादनिचृत्॥ द्वौ नवको
षट्कश्च सा नागी॥ विपरीता वाराही॥ तृतीयं द्विपाज्जागतगायत्राभ्यां॥ त्रिपात्त्रैष्टुभैः॥ उष्णिग्गायत्रौ जाग
तश्च॥ ककुम्मध्ये चेदंत्यः॥ पुरउष्णिक् पुरतः॥ परोष्णिक् परतः॥ चतुष्पाद्भूतानि॥ अनुष्टुब्गायत्रैः॥ त्रिपा क्व
चिज्जागताभ्यां च॥ मध्येंते च॥ बृहती जागतस्त्रयश्च गायत्राः॥ पथ्या पूर्वश्चेत्तृतीयः॥ न्यंकुसारिणी द्वि
तीयः॥ स्कंधोग्रीवी क्रौष्टुकेः॥ उरोबृहती यास्कस्य॥ उपरिष्टाद्बृहत्यंते॥ पुरस्ताद्बृहती पुरः॥ क्वचिन्नव
काश्चत्वारः॥ विराजौ गायत्रौ च॥ त्रिभिर्जागतैर्महाबृहती॥ सतोबृहती तांडिनः॥ पंक्तिर्जागतौ गाय
त्रौ च॥ पूर्वौ चेदयुजौ सतः पंक्तिः॥ विपरीतौ च॥ प्रस्तारपंक्तिः पुरतः॥ आस्तारपंक्तिः परतः॥ विष्टारपंक्ति
रंतः॥ संस्तारपंक्तिर्बहिः॥ अक्षरपंक्तिः पंचकाश्चत्वारः॥ द्वावल्पशः॥ पदपंक्तिः पंच॥ चतुष्कषट्कौ च य ६

श्च॥ पथ्या पंचभिर्गायत्रैः॥ जगती षड्भिः॥ एकेन त्रिष्टुब्ज्योतिष्मती॥ तथा जगती॥ पुरस्ताज्ज्योतिः प्रथमेन॥ मध्ये
ज्योतिर्मध्यमेन॥ उपरिष्टाज्ज्योतिरंत्येन॥ एकस्मिन्पंचके छंदः शंकुमती॥ षट्के ककुद्मती॥ त्रिपादणिष्टमध्या
पिपीलिकमध्या॥ विपरीता यवमध्या॥ ऊनाधिकेनैकेन निचृद्भुरिजौ॥ द्वाभ्यां विराट्स्वराजौ॥ आदितः
संदिग्धे देवतादितः॥ असमो ब्रवइति देवताः॥ सिमापिकृनीलोगौ वर्णाः॥ षड्गामपधैनि स्वरा इति॥
आदितः संदिग्धे देवतादितोग्निः सविता सोमो बृहस्पतिर्वरुण इंद्रो विश्वेदेवाः॥ स्वराः षड्जादयः॥ षड्ज ऋ
षभ गांधार मध्यम पंचम धैवत निषाद स्वरा इति॥ सित सारंग पिशंग कृष्ण नील लोहित गौरा वर्णाः॥ रोच
ना नाम्नतयः॥ श्यामान्यतिछंदांसि॥ आग्निवेश्य काश्यप गौतम आंगिरस भार्गव कौशिक वासिष्ठा गो
त्राणीति॥ ३॥ चतुःशतमुत्कृतिः॥ चतुरश्चतुरस्त्यजेदुत्कृतेः॥ तान्यभिसंख्यायेत्यः॥ प्रसत्या च अथ शिरः

...रगीसदेयम

कं द्वीजगत्या॥ष्टयकृदृष्टयकृच्छर्वतएतान्यैवेषां॥द्वितीयंद्वितीयमनिनः॥चत्वजोकव॥ओवैछुनाचपदार्थमस्तं
मनगि॥यथाहृत्नसमान्निर्वा॥जः॥सप्तुद्वागणा॥गोगंनमध्यादिसिश्चि॥स्वराईचार्याद्वि॥अत्रायुग्नेजूवछुजू
गा॥न्नोचेत्पदंद्वितीयादिः॥सप्तमःप्रथमादि॥अंत्यपंचमः॥षष्ठश्चलूत्रिषुगणेषुपादःपथ्या॥द्यचा॥विपु
ला॥चपला॥द्वितीयचतुर्थौश्चिध्ययेजौ॥श्वर्वेमुखश्रवा॥जघनश्वेतरत्रा॥उनयोर्महाचपला॥आद्यर्द्वसमा
ना॥अंत्यनोपगीतिः॥उत्क्रमेणोद्गीतिः॥अर्द्धेवसुगणआर्यगीतिः॥वैतालीयंद्विःस्वराद्युकादेयुग्व
तेल्गौ॥गोपछंदसिकं॥आपातलिकान्गौगू॥शेषेपरेणयुङ्माकं॥षड्वामिश्राद्युजोपंचमेनश्वर्वासा
चाच्यहृत्निः॥अयुक्तृतीयेनोदीच्यहृत्निः॥आन्यांयुगपत्प्रवृत्तकं॥अयुक्चारुहासिनी॥युगपरांति
का॥गंताद्विर्वसवोमात्रासमकंनवमः॥द्वादशश्ववानवासिका॥विश्लोकःपंचमाष्टमौ॥चित्रानवमश्च॥ 9

परयुक्तेनोपचित्रा॥प्रथमचतुर्थयोर्नंदरी॥एन्निःपादाकुलकं॥गीत्यार्यलिः॥गश्चेज्जौम्या॥जः॥श्वर्वश्वेज्ज्योतिः॥शिखा
विपर्यस्ताद्वा॥खलिका॥ईमेकात्रिंशादेकत्रिंशदंतेगू॥सांगयेननसमानांस्मृइति॥प॥वृत्तं॥सममर्द्धसमंविष
मंच॥सममंतावच्छत्वा॥स्ततमर्द्धसमं॥विषमंचारा॥श्वनां॥स्निनिसमानी॥स्निनिप्रमाणी॥वितानमन्यत्तू॥पादस्या
नुष्टुब्वक्रं॥नप्रथमात्स्नौ॥वान्यत्तू॥यच्चतुर्थात्तू॥पथ्यायुजोज्जू॥विपरीतैकीयं॥चपलायुजोन्ना॥विपुलायुग्लः
सप्तमः॥सर्वतःसैतवस्य॥ग्रौनन्नौचा॥प्रतिपादंचतुर्द्धथ्यापदंचतुरूर्द्धं॥गांवंनआपीडः॥आदौचप्रत्या
पीडः॥प्रत्यापीडोगावादौचा॥प्रथमस्यविपर्यासेमंजरीलवल्यमृतधारा॥उद्गतामेकतज्जौ स्जौन्सौ
जौ॥न्सौज्जौगुज्जौस्जौगू॥तृतीयस्यसौरभकेनौन्गौ॥ललितंनौसौ॥उपस्थितप्रचुपितंश्थगाद्भम्सौ
न्जौगोस्नौज्रौगूनौस्नौनाज्यौ॥वर्द्धमानंनौस्नान्यौ॥श्रद्धविराड्वृषभंजः॥अर्द्धेउपचित्रकंसौस्लौग्सौ

नौ गू॥ द्रुतमध्या नौ न्गौ गु न्जौ ज्यौ॥ वेगवती सौ स्गौ नौ नौ गू॥ भद्रविराड् तौ ज्गौ म्सौ ज्गौ गू॥ केतुमती ज्गौ गौ
त्रौ गौ गू॥ आख्यानिकी तौ ज्गौ गु ज्तौ ज्गौ गू॥ विपरीताख्यानिकी ज्तौ ज्गौ गू तौ ज्गौ गू॥ हरिणप्लुता सौ
स्लौ गु न्भौ भ्रौ॥ अपरवक्त्रं नौ जौ गु ज्रौ ज्यौ॥ पुष्पिताग्रा नौ यजौ ज्रौ ग्रौ गू॥ यवमती र्जौ र्जौ ज्रौ ग्रौ गू॥ शि
खैकान्नत्रिंशदेकत्रिंशदन्ते गू॥ खंजा महत्युज्जीति॥ ५॥ यति विच्छेदः॥ तनुमध्या त्यौ॥ कुमारललिता
ज्सौ गू॥ चित्रपदा भौ गौ॥ विद्युन्माला मौ गौ॥ माणवकाक्रीडितकं भ्तौ ल्गौ॥ हलमुखी र्नौ सः॥ भुजगशि
शुसृता नौ मः॥ हंसरुतं म्नौ गौ॥ शुद्धविराट् म्सौ ज्गौ॥ पणवो म्नौ य्गौ॥ मयूरसारिणी र्जौ र्गौ॥ मत्ता म्भौ स्गौ
उपस्थिता ज्तौ ज्गौ॥ रुक्मवती भ्मौ स्गौ॥ इन्द्रवज्रा तौ ज्गौ गू॥ उपेन्द्रवज्रा ज्तौ ज्गौ गू॥ आद्यन्तावुपजातयः॥ ८
दोधकं भौ भौ गू॥ शालिनी म्तौ तौ गौ गू समुद्रऋषयः॥ वातोर्मी म्भौ त्गौ गू चतुःस्वराः॥ भ्रमरविलसिता म्भौ

न्लौ गू समुद्रऋषयः॥ रथोद्धता रौ न्रौ ल्गौ॥ स्वागता रौ नौ भ्गौ गू॥ वृन्ता नौ स्गौ गू॥ श्येनी र्जौ र्जौ गू॥ जगती॥ वंशस्थं ज्तौ ज्रौ॥ इन्द्रवं
शा तौ ज्रौ॥ तोटकं सः॥ द्रुतविलम्बितं न्भौ भ्रौ॥ श्रीपुटो नौ म्यौ वसुसमुद्राः॥ जलोद्धतगतिर्ज्सौ ज्सौ रसर्तवः॥ ततं नौ म्रौ
कुसुमविचित्रा न्यौ न्यौ॥ चंचलाक्षिका नौ रौ॥ भुजंगप्रयातं यः॥ स्रग्विणी रः॥ प्रमिताक्षरा ज्सौ ज्सौ॥ कान्तोत्पीडा भ्मौ
स्मौ॥ वैश्वदेवी मौ यौ विन्द्रियर्षयः॥ नवमालिनी न्जौ भ्यौ विति॥ ७॥ प्रहर्षिणी म्नौ ज्रौ गू त्रिकदशकौ॥ रुचिरा
ज्भौ स्जौ गू चतुष्कनवकौ॥ मत्तमयूरं म्तौ य्सौ गू समुद्रनवकौ॥ गौरी नौ न्सौ गू॥ असंबाधा म्तौ न्सौ गौ विन्द्रियन
वकौ॥ अपराजिता नौ र्सौ ल्गौ स्वरर्षयः॥ प्रहरणकलिता नौ भ्नौ ल्गौ द्विरराः॥ वसन्ततिलका त्भौ ज्जौ गौ॥ सिंहो
न्नताकाश्यपस्य॥ उद्धर्षिणी सैतवस्य॥ चन्द्रावर्त्ता नौ नौ सः॥ मालात्तु नवकौ चेत्॥ मणिगुणनिकरो वस्वृषयः॥ मालि
नी नौ म्यौ य्यौ स्वृषयः॥ ऋषभगजविलसितं भ्रौ नौ नौ गः स्वरनवकौ॥ शिखरिणी य्मौ न्सौ भ्लौ गू रसरुद्राः॥ पृथ्वी

ज्ञो ज्ञौ ॥ ६ ॥ इो गुरुवस्तुनवको ॥ वंशपत्रपतितं ज्ञौ स्नौ ज्ञो गुदिग्रूषयः ॥ हरिणी न्सौ स्रौ स्लो ग कुस मुद्र ज्ञस्यः ॥
मं ९ दाक्रांता स्रौ न्तौ गौ गुसमुद्र ऋतुस्वराः ॥ कुसुमितलतावेल्लिता स्नौ न्यौ या विंद्रियर्तुस्वराः ॥ शार्दूलविक्रीडितं
म्सौ ज्सौ तौ गा दित्यऋषयः ॥ स्रग्धरा म्रौ भ्नौ यौ याद्रिषिस्वरर्त्तवः ॥ इति नितंबं ॥ स्वग्धरा म्रौ भ्नौ यो यः ॥ त्रि
सप्तकाः ॥ मत्तकं श्रीत्रौ त्रौ गौ दिगादित्याः ॥ अवलजितं ज्ञो ज्ञो ज्ञो गुरुद्वादित्याः ॥ मत्ताक्रीडा मौ त्रौ ना
त्नौ गुवसुपंचदशकौ ॥ तन्वी त्रौ स्रौ नौ न्या विंद्रियस्वरमासाः ॥ क्रौंचपदा भौ स्मौ नौ नौ गुरुत्तं द्रियवसुपयः ॥
भुजंगविजृंभितं मात्रौ नौ स्रौ ज्ञौ वसुरुद्रऋषयः ॥ अपवाहको म्नौ नौ नौ न्सौ गौ नवर्त्तुरसेंद्रियाः ॥ ११ ॥ दंड
को नौ रः ॥ प्रथमश्चंडवृष्टिप्रयातः ॥ अन्यत्र रात मांउव्याल्यां ॥ शेषः प्रचितइति ॥ ८ ॥ अत्रामिदंगाथा ॥ द्विको ८
ग्लौ ॥ मिश्रौ च ॥ पृथग्लामिश्राः ॥ वसवस्त्रिकाः ॥ एकोनरक्रमशः ॥ पूर्वपृष्टकाज्जमंख्या ॥ अंगुलपृथुदस्मादंडकोऽगाः ॥

योजनमित्यधा ॥ जर्द्धे सैकेगः ॥ भनिजो मगुणं ॥ द्विर्जद्धिंतनो ग्येकंजखान् ॥ द्विरर्द्धे रूपे शून्यं ॥ द्विः शून्ये ना वदर्द्धे तगु
णितं ॥ द्विशून्ये नतदंतानां ॥ परेशसंपरेष्वमिति ॥ ७ ॥ इतिछंदः समाप्तः ॥ ॥ ७ ॥ गोः ॥ क्ष्मा ॥ क्ष्मा ॥ क्ष्मा ॥ क्ष्मा ॥ क्षा ॥ मा ॥ क्षो
णी ॥ क्षितिः ॥ अवनिः ॥ उर्वशी पृथ्वी ॥ मही ॥ रिपः ॥ अदितिः ॥ इला ॥ निर्ऋतिः ॥ गा उः ॥ इः ॥ भूमिः ॥ भूषा ॥ गोत्रेति पृथिव्याः ॥ रे
॥ १ ॥ हेमाचंद्रः ॥ रुक्मं ॥ अयः ॥ हिरण्यं ॥ पेशः ॥ कृशनं ॥ लोहं ॥ कनकं ॥ कांचनं ॥ नर्म ॥ अमृतं ॥ मरुत् ॥ दत्तं ॥ जातरूपमिति हिरण्य
स्य ॥ १ ॥ ३ ॥ अंबरं ॥ वियत् ॥ व्योम ॥ बर्हिः ॥ धन्वा ॥ अंतरिक्षं ॥ आकाशं ॥ आपः ॥ पृथिवी ॥ भूः ॥ स्वयंभूः ॥ अध्वा ॥ पुष्करं ॥ सगरं ॥ समु
द्रः ॥ अध्वरमित्यंतरिक्षस्य ॥ १६ ॥ ३ ॥ स्वः ॥ पृश्निः ॥ नाकः ॥ गोः ॥ विष्टप् ॥ नभ इति साधारणानि ॥ ६ ॥ ४ ॥ खेदयः ॥ किरणाः ॥ गा
वः ॥ रश्मयः ॥ अभीशवः ॥ दीधितयः ॥ गभस्तयः ॥ वनं ॥ उस्राः ॥ वसवः ॥ मरीचिपाः ॥ मयूखाः ॥ सप्तऋषयः ॥ साध्याः ॥ सुपर्णा
इति रश्मीनां ॥ १५ ॥ ५ ॥ आताः ॥ आशाः ॥ उपराः ॥ आष्ठाः ॥ काष्ठाः ॥ व्योम ॥ ककुभः ॥ हरित इति दिशां ॥ ८ ॥ ६ ॥ श्या ॥ वी ॥ क्षपा ॥

तमस्वती॥

शर्वरी॥ अक्तुः॥ ऊर्म्या॥ रम्या॥ यम्या॥ नम्या॥ दोषा॥ नक्ता॥ तमः॥ रजः॥ असिक्नी॥ पयस्वती॥ घृताची॥ शिरीणा॥
मोकी॥ शोकी॥ ऊधः॥ पयः॥ हिमा॥ वस्वी इति रात्रेः॥ २३॥ ७॥ विभावरी॥ सूनरी॥ भास्वती॥ ओदती॥ चित्रामघा॥ अर्जुनी॥
वाजिनी॥ वाजिनीवती॥ सुम्नावरी॥ अहना॥ द्योतना॥ श्वैत्या॥ अरुषी॥ सूनृता॥ सूनृतावती॥ सूनृतावरीत्युषसः॥
१६॥ ८॥ वस्तोः॥ द्युः॥ भानुः॥ वासरं॥ स्वसराणि॥ घ्रंसः॥ घर्मः॥ घृणिः॥ दिनं॥ दिवा॥ दिवेदिवे॥ द्यविद्यवीत्यह्नः॥ १२॥
९॥ अद्रिः॥ ग्रावा॥ गोत्रः॥ वलः॥ अश्नः॥ पुरुभोजाः॥ पर्शनिः॥ अश्मा॥ पर्वतः॥ गिरिः॥ व्रजः॥ चरुः॥ वराहः॥ शंब
रः॥ रौहिणः॥ रैवतः॥ फलिगः॥ उपरः॥ उपलः॥ चमसः॥ अहिः॥ अभ्रं॥ बलाहकः॥ मेघः॥ दृतिः॥ ओदनः॥ वृषंधिः॥
वृत्रः॥ असुरः॥ कोशः इति मेघानां॥ ३०॥ १०॥ श्लोकः॥ धारा॥ इडा॥ गौः॥ गौरी॥ गांधर्वी॥ गभीरा॥ गंभीरा॥ मंद्रा॥ मंद्रा १
जनी॥ वाशी॥ वाणी॥ वाणीची॥ वाणः॥ पविः॥ भारती॥ धमनिः॥ नालिः॥ मेहिः॥ मेनिः॥ सूर्या॥ सरस्वती॥ निवित्॥

स्वाहा॥ वग्नुः॥ उपब्दिः॥ मायुः॥ काकुत्॥ जिह्वा॥ घोषः॥ स्वरः॥ शब्दः॥ स्वनः॥ ऋक्॥ होत्रा॥ गीः॥ गाथा॥ गणः॥ धेना॥ ग्नाः॥ विपा॥
नना॥ कशा॥ धिषणा॥ नोः॥ अक्षरं॥ मही॥ अदितिः॥ शची॥ वाक्॥ अनुष्टुप्॥ धेनुः॥ वल्गुः॥ गल्दा॥ सरः॥ सुपर्णी॥ बेकुरे
ति वाचः॥ ५७॥ ११॥ अर्णः॥ क्षोदः॥ क्षद्म॥ नभः॥ अंभः॥ कबंधं॥ सलिलं॥ वाः॥ वनं॥ घृतं॥ मधु॥ पुरीषं॥ पिप्पलं॥ क्षीरं॥
विषं॥ रेतः॥ शकं॥ जन्म॥ वृबूकं॥ बुसं॥ तुग्र्या॥ बुर्बुरं॥ सुक्षेम॥ धरुणं॥ सुरा॥ अररिंदानि॥ ध्वस्मन्वत्॥ जामिः॥ आयु
धानि॥ क्षपः॥ अहिः॥ अक्षरं॥ स्रोतः॥ तृप्तिः॥ रसः॥ उदकं॥ पयः॥ सरः॥ भेषजं॥ सहः॥ शवः॥ ओजः॥ सुखं॥ क्षत्रं॥ आवयाः॥
शुभं॥ यादः॥ भूतं॥ भुवनं॥ भविष्यत्॥ आपः॥ महत्॥ व्योम॥ यशः॥ महः॥ स्वर्णीकं॥ स्मृतीकं॥ स्वृतीकं॥ सतीकं॥ सतीनं॥
गहनं॥ गभीरं॥ गह्वरं॥ कं॥ अन्नं॥ हविः॥ सद्म॥ सदनं॥ ऋतं॥ योनिः॥ ऋतस्य योनिः॥ सत्यं॥ नीरं॥ रयिः॥ सत्॥ पूर्णं॥ सर्वं॥
अक्षितं॥ बर्हिः॥ नाम॥ सर्पिः॥ अपः॥ पवित्रं॥ अमृतं॥ इंदुः॥ हेम॥ स्वः॥ सर्गाः॥ शंबरं॥ अभ्वं॥ वपुः॥ अंबु॥ तोयं॥ [illegible]

धुनयः॥

कं॥ तेजः॥ स्वधा॥ अक्षरं॥ वारि॥ जलं॥ जलाषं॥ इदमित्कदकस्य॥१२॥१२॥ अवनयः॥ यव्याः॥ खाः॥ सीराः॥ स्रोत्याः॥ ए
न्यः॥ रुजानाः॥ वक्षणाः॥ खादोअर्णाः॥ रोधचक्राः॥ हरितः॥ सरितः॥ अग्रुवः॥ नभन्वाः॥ वध्वः॥ हिरण्यवर्णाः॥ रोहितः॥
सश्चतः॥ अर्णाः॥ सिंधवः॥ कुल्याः॥ वय्यः॥ उर्व्यः॥ इरावत्यः॥ पार्वत्यः॥ स्रवन्त्यः॥ ऊर्जस्वत्यः॥ पयस्वत्यः॥ तरस्वत्यः॥ स
रस्वत्यः॥ हरस्वत्यः॥ रोधस्वत्यः॥ भास्वत्यः॥ अजिराः॥ मातरः॥ नद्य इति नदीनां॥३७॥१३॥ अत्यः॥ हयः॥ अर्वा॥ वाजी॥
सप्तिः॥ वह्निः॥ दधिक्राः॥ दधिक्रावा॥ एतग्वः॥ एतशः॥ पैद्वः॥ दौर्गहः॥ औच्चैःश्रवसः॥ तार्क्ष्यः॥ आशुः॥ ब्रध्नः॥ अरुषः॥
मांश्चत्वः॥ अव्यथयः॥ श्येनासः॥ सुपर्णाः॥ पतंगाः॥ नरः॥ वार्याणां॥ हंसासः॥ अश्वा इत्यश्वानां॥२६॥१४॥ हरी इंद्र
स्य॥ रोहितोग्नेः॥ हरित आदित्यस्य॥ रासभावश्विनोः॥ अजाः पूष्णः॥ पृषत्यो मरुतां॥ अरुण्यो गाव उषसां॥ श्या
वाः सवितुः॥ विश्वरूपा बृहस्पतेः॥ नियुतो वायोरित्यादिष्टोपयोजनानि॥१०॥१५॥ भ्राजते॥ भ्राशते॥ भ्राशते॥

...नते। कल्मली। किनो। भ्राजते। भ्राशते। हरी इंद्रस्य। रोहितोग्नेः। अत्यः। हयः। अवनयः। यव्याः। अर्णः
श्लोकः। धाराः। अद्रिः। ग्रावा। वल्गुः। धुः। धिनावरी। सूनरी। श्यावी। क्षपा। आताः। आशाः। स्वेदयः
किरणाः॥ स्व॥ रश्मि॥ अंशवः॥ ... हंस॥ ...॥ गोः॥ ग्नाः॥

दीदयति॥ शोचति॥ मंदते॥ नंदते॥ रोचते॥ ज्योतते॥ द्योतते॥ द्युमदिति ज्वलतिकर्माणः॥११॥१६॥ जमत्॥ कल्मलीकि
नं॥ जंजणाभवन्॥ मल्मलाभवन्॥ अर्चिः॥ शोचिः॥ तपः॥ तेजः॥ हरः॥ हृणिः॥ शृंगाणि॥ शृंगाणि॥ ज्वलतः॥११॥१७॥
॥इति प्रथमोऽध्यायः॥ ॥१॥ अपः॥ अप्नः॥ दंसः॥ वेशः॥ वेपः॥ विष्टी॥ व्रतं॥ कर्वरं॥ करणं॥ शम्म॥ क्रतुः॥ करणानि॥ क
रांसि॥ करिक्रत्॥ करंति॥ चक्रत्॥ कर्त्तुं॥ कर्त्तोः॥ कर्त्तवे॥ तत्त्वी॥ धीः॥ शची॥ शमी॥ शिमी॥ शक्तिः॥ शिल्पमिति कर्म
णः॥२६॥१॥ तुक्॥ तोकं॥ तनयं॥ तोक्म॥ तक्म॥ शेषः॥ अप्नः॥ गयः॥ जाः॥ अपत्यं॥ यहुः॥ सूनुः॥ नपात्॥ प्रजा॥ बीज
मित्यपत्यस्य॥१५॥२॥ मनुष्याः॥ नराः॥ नरः॥ जंतवः॥ विशः॥ क्षितयः॥ कृष्टयः॥ चर्षणयः॥ नहुषः॥ अरयः॥ मर्याः॥
मर्त्याः॥ मर्त्राः॥ व्राताः॥ तुर्वशाः॥ द्रुह्यवः॥ आ यवः। यदवः। अनवः। पूरवः। जगतः। तस्थुषः। पंचजनाः। विवस्वन्तः
पृतनाः इति मनुष्याणां॥२५॥३॥ आयती॥ च्यवाना। अनीश्वः। अप्नवाना। विनंगृसो। गभस्ती। करस्नौ। बाहू॥
अप्नवाना। विनंगृसो। गभस्ती। करस्नौ। बाहू

त्वरिजौ॥ह्विपस्त्री॥शक्करी॥नरिन्ने इति बाहोः॥अयुवः॥अण्वेः॥क्षिपः॥विशः॥शर्यैः॥रशनाः॥धीतयः॥
अ थर्यः॥विपः॥कक्ष्याः॥अवनयः॥हरितः॥रोहितः॥स्वसारः॥जामयः॥सनाभयः॥योक्राणि॥योजनानि॥धुरः॥शा
खाः॥अभीशवः॥दीधितयः इत्यंगुलीनां॥२२॥५॥वश्मि॥उश्मसि॥अववेत्ति॥वेत्ति॥वेनति॥वेमति॥वांछति॥व
ष्टि॥वनोति॥जुषते॥हर्यति॥उशन्॥मन्यते॥शंसनन्॥चाकनत्॥चकमानः॥कनति॥कानिषदिति कांतिक
र्माणः॥१८॥६॥अंधः॥वाजः॥पाजः॥पयः॥प्रद्धः॥पितुः॥सुतं॥सिनं॥अवः॥क्षुत्॥धासि॥इरा॥इला॥इषं॥ऊर्क्॥
रसः॥स्वधा॥अर्कः॥वयः॥क्षद्म॥नेमा॥ससं॥नमः॥आयुः॥सूनृता॥ब्रह्म॥वर्चः॥कीलालमित्यन्नस्य॥२८॥७॥
आवयति॥भर्वति॥बभस्ति॥वेति॥वेवेष्टि॥अविष्यन्॥बभ्सति॥नसथः॥बब्धां॥क्ष्यती त्यत्तिकर्माणः॥१०॥८॥ १२
ओजः॥पाजः॥शवः॥तवः॥तरः॥त्वक्षः॥शर्धः॥बाधः॥नृम्णं॥तविषी॥शुष्मं॥शुष्णं॥दक्षः॥वीळु॥च्यौत्नं॥शुष्मं॥सहः॥

यः॥वधः॥वर्गः॥वृजनं॥विद्रू॥मज्मना॥पौंस्यानि॥धर्णसि॥द्रविणं॥स्यंद्रासः॥शंबरमिति बलस्य॥२८॥९॥मघं॥रेक्णः॥रिक्थं॥
वेदः॥वरिवः॥श्वात्रं॥रत्नं॥रयिः॥क्षत्रं॥भगः॥मीळ्हुं॥गयः॥द्युम्नं॥इंद्रियं॥वसु॥रायः॥राधः॥भोजनं॥तना॥बंधुः॥मेधा॥
यशः॥ब्रह्म॥द्रविणं॥शवः॥वृत्रं॥ऋतमिति धनस्य॥२८॥१०॥अघ्न्या॥उस्रा॥उस्रिया॥अही॥मही॥अदितिः॥इला॥ज
गती॥शक्करी निगवांगणं॥९॥११॥रेजते॥हेळते॥नामते॥हृणीयते॥भ्रीणाति॥भ्रेशति॥दोधति॥वनुष्यति॥कंपते॥भोज
त इति क्रुध्यतिकर्माणः॥१०॥१२॥हेळः॥हरः॥घृणिः॥त्यजः॥भामः॥एहः॥वरः॥तपुषी॥जूर्णिः॥मन्युः॥व्यथिरिति
क्रोधस्य॥११॥१३॥वर्तते॥अयते॥लोटते॥लोठते॥स्यंदति॥कसति॥सर्पति॥स्यमति॥स्रवति॥स्रंसति॥श्वोतति॥ध्वंस
ति॥वेनति॥मार्ष्टि॥भुरण्यति॥शवति॥काजयति॥पेजयति॥कंटति॥पिस्यति॥विस्यति॥मिस्यति॥प्रवते॥प्ल
ते॥च्यवते॥कवते॥गवते॥अवते॥क्षोदति॥मच्छति॥स्यच्छति॥मियच्छति॥सचति॥ऋच्छति॥तुरीयति॥सरति॥

अनति।पतति।चलति।मश्चति।रंहति।अमति।अजति।रजति।जजति।ह्रियति।हिणोति।ऊणवति।सिसर्ति।
शिष्टि।योशिष्टि।ऋणाति।रिणाति।इयर्ति।रीयते।नेदति।नख्यति।दध्यति।दभ्नोति।युध्यते।धन्वति।अररिष
ति।अजर्यति।ईयते।तकति।दीयते।ईषति।फणति।मस्वति।मिस्वति।धवति।धावति।हमति।हयति।इन्वे।अ
यति।चाहति।गंति।गनीगंति।जगंति।जगाति।जगति।गमति।मिनति।श्रति।ध्राति।भ्रयति।क्षवति।वध्नूय
ति।अथर्यति।ईहते।जेहति।वदति।द्राति।रूह्हति।एजति।वंचति।षक्कति।ध्वक्कति।लुंपति।भ्राति।वाति।
याति।जायति।पनयति।पवते।हंति।सेधति।अगन्।अजगन्।आगनीगंति।गाति।जिगाति।इन्वति।व्रज
ति।छुम्मति।वेति।हर्यंता।जगायात्।अयुधुरिति गतिकर्माणः॥१२२॥१४॥ तु।मक्षु।द्रवत्।तूर्षं।जीराः।तू १३
र्णिः।शर्व्राः।स्वधनाः।शीघं।तृष्णु।तोयं।तृषिः।अजिरं।भुरण्यः।शु।आशु।प्राशु।विन्।तुजानासः।दूव
इवतिः२

जिन्।तुज्यमानासः।अज्राः।साचीवत्।द्युगत्।ताजत्।तरणिः।वातरंहा इति क्षिप्रस्य॥२६॥१५॥ तडित्।आसात्।अंब
रे।तुर्वशे।अस्तमीके।आके।उपाके।अर्वाके।अंतमानां।अवमे।उपम इत्यंतिकस्य॥११॥१६॥ रणः।विवाक्।नदनुः।
विखादः।नदः।आक्रंदे।आहवे।आजौ।पृतनाज्ये।अनीके।समीके।ममसत्यं।नेमधितिः।संकाः।समितिः।समनं।
मीह्ळे।पृतनाः।स्पृधः।मृधः।पृत्सुधः।समत्सु।समरणे।समोहे।संखे।संगे।संयुगे।समर्ये।वृत्रतूर्ये।पृक्षे।आ
णौ।प्रधने।शूरसातौ।वाजसातौ।समनीके।खले।खजे।पौंस्ये।महाधने।वाजे।अग्मन्।सग्मन्।समीथे।संगथे।
संयतः।संवत इति संग्रामस्य॥४६॥१७॥ इन्वति।ननक्षे।आक्षाणः।आनट्।आष्ट।आपानः।आनशे।अशत्।
नशत्।अश्नुत इति व्याप्तिकर्माणः॥१०॥१८॥ दभ्नोति।श्नथति।श्नथ्यति।ध्वरति।धूर्वति।दृणक्ति।वृश्चति।तृणा
ति।स्नेहति।श्वसति।नमति।अर्दति।मर्दति।स्नेहति।याचति।स्फुरति।स्फुजति।निवपति।अवति।र तिकिण

अंधः। वाजः। द्रग्मि। ऊग्मसि। अपुदः। ...। आपनो। स्याय

नः। आनिरन्नू। नक्षिन्नू। आखंडलः। हणाति। श्नाति। मिनाति। ...क्षोदति। ताडयति। निंतोसयति। निबर्हयति। मिनो
ति। स्त्र्वति। क्षमतीति वधकर्माणः ॥१९॥ दिद्युत्। नेमिः। हेतिः। नमः। पविः। वज्रः। सृकः। वृकः। वधः। हस्तः॥
ऊत्सः। मेनिः। कुलिशः। तुंजः। तिग्मः। स्वधितिः। सायकः। परशुरिति वज्रस्य ॥२०॥ इरज्यति। पत्यते। क्षि
यति। राजतीत्यैश्वर्यकर्माणः ॥४॥२१॥ राष्ट्री। अर्यः। नियुत्वान्। इनः इन इनइती श्वरस्य ॥४॥२२॥ इति द्वितीयोध्या
यः समाप्तः ॥ ॥१॥ उरु। तुवि। पुरु। भूरि। शश्वत्। विश्वं। परीणसा। व्यानशिः। शतं। सहस्रं। सरिरं। कुविदिति ब
हो ॥२॥१॥ रिहं। ह्रस्वः। निष्टृष्वः। त्रिषमः। मायुकः। प्रतिष्ठा। कृधुकः। वम्रकः। दहरकः। अर्भकः। अल्पकमि
ति ह्रस्वस्य ॥ ॥२॥ महान्। ब्रध्नः। ऋष्वः। उक्षा। उक्षितः। महिषः। अभ्वः। तवसः। तविषः। ऋतुक्षाः। उक्षा। विहा १४
याः। यह्वः। ववक्षिथ। विवक्षसे। अंभृणः। गभीरः। मायिनः। ककुहः। रभसः। व्राधन्। विरप्शी। अद्भुतः। ब

र्हिष्ठः। बर्हिषीति महतः ॥२५॥३॥ गयः। छर्दिः। गर्तः। हर्म्यं। नीडं। अस्तं। पस्त्यं। दुरोणं। दुर्याः। स्वसराणि। अमा। दमे।
कृत्तिः। योनिः। शमी। शरणं। वरूथं। छर्दिः। छदिः। छाया। वर्म। अथ्मेति गृहाणां ॥२२॥४॥ इरध्यति। विधेम। सपर्यति।
नमस्यति। दुवस्यति। ऋध्नोति। ऋणद्धि। ऋच्छति। शवति। विवासतीति परिचरणकर्माणः ॥१०॥५॥ शिंबाता। श
तरा। शातपंता। शिघ्नु। शेवृधं। स्यूमकं। मयः। सुम्नं। सुदिनं। शूषं। शुनं। शं। भेषजं। जलाषं। स्योनं। शेवं। शिवं।
शग्म्यं। कदिति सुखस्य ॥२०॥६॥ निर्णिक्। वव्रिः। वर्पः। वपुः। अप्नः। अमतिः। अप्सः। वशः। पिष्टं। पेशः। कृशनं।
मरुत्। अर्जुनं। ताम्रं। अरुषं। शिल्पमिति रूपस्य ॥१६॥७॥ अस्रेमा। अनेद्यः। अनिंद्यः। अनभिशस्तिः। अन
वद्यः। उक्थ्यः। सुनीथः। पाकः। वामः। वयुनमिति प्रशस्यस्य ॥१०॥ केतः। केतुः। चेतः। चित्तं। क्रतुः। असुः। धीः।
शची। माया। वयुनो अनिरव्येति प्रज्ञायाः ॥११॥९॥ बट्। श्रत्। सत्रा। अद्धा। इत्था। ऋतमिति सत्यस्य।

चिकं॥चनचाष्ट्म॥चष्टे॥विचष्टे॥विचर्षणिः॥विश्वचर्षणिः॥अवचाकशदिति पश्यतिकर्माणः॥ ... कु॥ तु
कं॥ सुकं॥ आकीं॥ नकीं॥ नकिः॥ माकीं॥ माकिः॥ आकृतमित्या मिश्राणि॥१॥१२॥ इदमिव॥ इदं यथा॥ अग्निर्नये॥
चतुरश्चिद्ददमानात्॥ ब्राह्मणा व्रतचारिणः॥ वृक्षस्य नु ते पुरुहूत वयाः॥ जार आ भगं॥ मेषो भूतो३ऽभि यन्नयः॥
तद्रूपः॥ तद्वर्णः॥ तद्वत्॥ तथेत्युपमाः॥१२॥१३॥ अर्चति॥ गायति॥ रेभति॥ स्तोभति॥ गूर्द्धयति॥ गृणाति॥ जरति॥
ह्वयति॥ रिहति॥ धमति॥ नदति॥ पृच्छति॥ स्तुपा॥ सपर्यति॥ पनस्यति॥ पनायते॥ वल्गूयति॥ मंदते॥ छंदति॥ छद
यति॥ शशमानः॥ रंजयति॥ रंजयति॥ शंसति॥ स्तौति॥ यौति॥ रौति॥ नौति॥ नंदते॥ नमति॥ नमायते॥ स्वपिति॥
पिष्टस्ता॥ महयति॥ वाजयति॥ पूजयति॥ स्वदति॥ मदति॥ रसति॥ वेनति॥ कल्पते॥ जल्पति॥ मंचयते॥ वंदत इ २५
त्यर्चतिकर्माणः॥४४॥१४॥ विप्रः॥ विप्यः॥ गृत्सः॥ धीरः॥ वेनः॥ मेधाः॥ कण्वः॥ ऋभुः॥ नवेदाः॥ कविः॥ मनीषी॥ मंधाता॥

विधाता॥ मनश्चित्॥ विपश्चित्॥ विपन्यवः॥ आकेनिपः॥ केनिपः॥ उशिजः॥ कीस्तासः॥ अद्धातयः॥ मतयः॥ मन्तथाः॥ मेधा
विन इति मेधाविनां॥२४॥१५॥ रेभः॥ जरिता॥ कारुः॥ कीरिः॥ नामुः॥ सूरिः॥ रुद्रः॥ नदः॥ नादः॥ छंदः॥ स्तुतूः॥ गौः॥ स्तुप
एक इति स्तोतॄणां॥१३॥१६॥ यज्ञः॥ वेनः॥ मेधः॥ नायी॥ अध्वरः॥ विदथः॥ सवनं॥ होत्रा॥ इष्टिः॥ देवताता॥ मखः॥ विष्णुः॥
इंदुः॥ प्रजापतिः॥ धर्म इति यज्ञस्य॥१५॥१७॥ नरताः॥ ऊरवः॥ वाघतः॥ हक्कबर्हिषः॥ सवाधः॥ यतस्रुचः॥ मरुतः॥ देव
यव इत्युत्विजां॥८॥१८॥ ईमहे॥ यामि॥ मन्महे॥ दद्धि॥ शग्धि॥ पूर्धि॥ द्धि॥ ररिहि॥ मिमीहि॥ ररिद्धि॥ मिमिद्धि॥ पापर
त्॥ यंतारः॥ यंति॥ इषुध्यति॥ मदेमहि॥ मनामहे॥ मायत इति याञ्चाकर्माणः॥१७॥१९॥ दाति॥ दाशति॥ दास
ति॥ राति॥ रासति॥ पृणक्ति॥ प्रीणाति॥ वृश्चति॥ शिक्षति॥ मंहत इति दानकर्माणः॥१०॥२०॥ परिस्त्रिवाणवस्ता अ
च्यर्षः॥ आशिष इत्यध्येषणाकर्माणः॥४॥२१॥ स्वपिति॥ सस्तीति द्वौ स्वपितिकर्माणौ॥२॥२२॥ वव्रः॥ काटः॥

काउः॥ खातः॥ अवटः॥ अवतः॥ क्रिविः॥ कूपः॥ सूदः॥ उत्सः॥ ऋश्यदात्॥ कारोतरः॥ कुशयः॥ केवटः इति कूपस्य॥
२३॥ त्रिप्रः॥ रिभ्रः॥ तक्वा॥ त्रिकाः॥ रिकाः॥ रिकाः॥ तायुः॥ तस्करः॥ वनर्गुः॥ हुरश्चित्॥ मुलीवारः॥ मलिम्लुचः॥ अघशं
सः॥ वृक इति स्तेनस्य॥ १४॥ २४॥ निण्यं॥ सस्वः॥ सनुतः॥ हिरुक्॥ प्रतीच्यं॥ अपीच्य मिति निर्णीतान्तर्हितनामधे
यानि॥ ६॥ २५॥ आके॥ पराके॥ पराचैः॥ आरे॥ परावत इति दूरस्य॥ ५॥ २६॥ प्रत्नं॥ प्रदिवः॥ प्रवयाः॥ सनेमि॥ पूर्व्यं॥
अह्नाय इति पुराणस्य॥ ६॥ २७॥ नवं॥ नूत्नं॥ नूतनं॥ नव्यं॥ इदा॥ इदानी मिति नवस्य॥ ६॥ २८॥ प्रपित्वे॥ अभीके॥
दभ्रं॥ अर्भकं॥ तिरः॥ सतः॥ त्वः॥ नेमः॥ ऋक्षाः॥ स्तृभिः॥ वम्रीभिः॥ उपजिह्विका॥ ऊर्दरं॥ सूर्दरं॥ रंसुः॥ पिनाकं॥ मे
ना॥ ग्नाः॥ शेपः॥ वैतसः॥ अया॥ एना॥ सिषक्ति॥ सचते॥ भ्यसते॥ रेजत इति द्विशः॥ २७॥ २९॥ सघा॥ उरंधा॥ धिष २९
णा॥ रोदसी॥ रोधसी॥ क्षोणी॥ अंभसी॥ रजसी॥ सदसी॥ सद्मनी॥ घृतवती॥ बहुले॥ गभीरे॥ गंभीरे॥ उण्यौ॥ नघ्रौ॥

॥श्री॥

चम्वौ॥ पार्थ्वौ॥ मही॥ उर्वी॥ पृथ्वी॥ बृहती॥ दूरेअन्ते॥ अपारे॥ अपारे इति द्यावापृथिव्योः॥ २४॥ ३०॥ इति तृतीयोध्यायः
समाप्तः॥ ॥४॥ जहा॥ निधा॥ शितामः॥ मेहना॥ दमूनाः॥ मूषः॥ इषिरः॥ कुरुतनः॥ जगरे॥ तितउः॥ शिप्रे॥ मध्या॥ मंह
ईर्मांतासः॥ कायमानः॥ लोधं॥ शीरं॥ विद्रधे॥ द्रुपदे॥ तुग्वनि॥ नंसंते॥ नसंतः॥ आहनसः॥ असमन्नः॥ इष्मिणः॥ वाहः॥
परितक्म्या॥ सुविते॥ दयते॥ नूचित्॥ दावने॥ अकूपारस्य॥ शिशीते॥ सुतुकः॥ सुप्रायणाः॥ अप्रायुवः॥ च्यवनः॥
रजः॥ हरः॥ जुहुरे॥ व्यंतः॥ कारुणः॥ वारी॥ विष्पत्॥ जामिः॥ पिता॥ शंयोः॥ अदितिः॥ एरिरे॥ जसुरिः॥ जरते॥ मंदि
ने॥ गोः॥ गातुः॥ दंसयः॥ तूताव॥ चयसे॥ वियुते॥ ऋधक्॥ अस्याः॥ अस्य॥ ६२॥ १॥ सस्निं॥ वाहिष्ठः॥ दावशानः॥ वार्यं॥
अंधः॥ असश्चन्ती॥ वनुष्यति॥ तरुष्यति॥ भंदनाः॥ आहनः॥ नदः॥ सोमो अक्षाः॥ श्वात्रं॥ ऊतिः॥ हासमाने॥ पद्भिः॥ स
सं॥ द्विता॥ व्राः॥ वराहः॥ स्वसराणि॥ शर्याः॥ अर्कः॥ पविः॥ वक्षः॥ धन्व॥ सिनं॥ इत्था॥ सचा॥ चित्॥ आ॥ द्युम्नं॥ पवित्रं॥ तो

दः॥स्वंचाः॥शिपिविष्टः॥विष्णुः॥आघृणिः॥पृथुज्रयाः॥अथर्युः॥काणुका॥अध्रिगुः॥अपांगूषः॥अपातमन्युः॥श्म
शा॥उर्वशी॥वयुनं॥वाजपस्त्यं॥वाजगंध्यं॥गध्यं॥गध्यति॥कौरयाणः॥तौरयाणः॥अह्रयाणः॥हरयाणः॥आरि
तः॥व्रंदिनः॥निष्षपी॥तूर्णाशं॥क्षुंपं॥निचुंपुणः॥पदिः॥पादुः॥वृकः॥जोषवाकं॥कृत्तिः॥श्वघ्नी॥समस्य॥कुटस्य॥
चर्षणिः॥शंबः॥केपयः॥तूतुमाकृषे॥अंसत्रं॥काकुदं॥बीरिटं॥अच्छ॥परि॥ईं॥सीं॥एनं॥एनां॥सृणिः॥२॥३॥
आशुशुक्षणिः॥आशात्याः॥काशिः॥कुणारुं॥अलातृणः॥सलल्लूकं॥कत्पयं॥विस्रुहः॥वीरुधः॥नक्षद्दाभं॥ ११२१
अस्कृधोयुः॥निशृंभाः॥बृबदुक्थं॥ऋदूदरः॥ऋदूपे॥पुलुकामः॥असिन्वती॥कपना॥भार्जीकः॥रुजानाः॥
जूर्णिः॥ओमना॥उपलप्रक्षिणी॥उपसि॥प्रकलवित्॥अभ्यर्धयज्वा॥ईक्षे॥क्षोणस्य॥अस्मे॥पाथः॥सवीम
नि॥सप्रथाः॥विदथानि॥श्रायंतः॥आशीः॥अजीगः॥अमूरः॥शशमानः॥देवो देवाच्या॥कृपा॥विजामातुः॥उ

मासः॥सोमानं॥अनवायं॥किमीदिने॥अमः॥अमीवा॥दुरितं॥अप्वा॥अमतिः॥श्रुष्टी॥पुरंधिः॥रुशत्॥रिशादसः॥सु
दत्रः॥सुविदत्रः॥आनुषक्॥तुर्वणिः॥गिर्वणसे॥अस्तृतैः॥स्तृतैः॥अम्यक्॥यादृश्मिन्॥जारयायि॥अग्रिया॥चनः॥प
चना॥उरुधा॥अमिनः॥जज्झती॥अप्रतिष्कुतः॥शाशदानं॥४॥३॥सृप्रः॥सुशिप्रः॥शिप्रे॥रंसु॥द्विबर्हाः॥अक्रः॥
उराणः॥स्तियानां॥स्तिपाः॥जबारु॥जरूथं॥कुलिशः॥तुंजः॥बर्हणा॥ततनुष्टिं॥इलीबिशः॥कियेधाः॥भृमिः॥
विष्पितः॥तुरीपं॥रास्पिनः॥रंजनि॥प्रतद्वसू॥हिनोत॥चोष्कूयमाणः॥चोष्कूयते॥सुमत्॥दिविष्टिषु॥दूतः॥जि ८
न्वति॥अमत्रः॥ऋचीषमः॥अनर्शरातिं॥अनर्वा॥असामि॥गल्दया॥जल्हवः॥बकुरः॥बेकनाटान्॥अभिधेतन॥
अंहुरः॥दूतः॥वातापी॥चाकन्॥रथर्यति॥असक्रां॥आधवः॥अनवब्रवः॥सदान्वे॥पराशरः॥क्रिविर्दती॥करूल
ती॥दनः॥शारुः॥इदंयुः॥कीकटेषु॥वृंदः॥बुंदः॥किः॥उल्बं॥ऋबीसं॥ऋबीसं॥५॥४॥इति चतुर्थोध्यायः॥
स्वः॥सुशिप्रः॥आशुशुक्षणिः॥आशात्यः॥सख्यं॥बार्हिष्ठः॥अहाभिधा॥

अग्निः॥जातवेदाः॥वैश्वानरः॥द्रविणोदाः॥इध्मः॥तनूनपात्॥नराशंसः॥इळः॥बर्हिः॥द्वारः॥उषासानक्ता॥दैव्याहोतारा॥
तिस्रोदेवीः॥त्वष्टा॥वनस्पतिः॥स्वाहाकृतयः॥२६॥३॥अश्वः॥शकुनिः॥मंडूकाः॥अक्षाः॥ग्रावाणः॥नाराशंसः॥रथः॥दुंदुभिः॥
हस्तघ्नः॥अभीशवः॥धनुः॥ज्या॥इषुः॥अश्वाजनी॥उलूखलं॥वृषभः॥द्रुघणः॥पितुः॥नद्यः॥आपः॥ओषधयः॥रात्रिः॥अ इषुधिः॥
रण्यानी॥श्रद्धा॥पृथिवी॥अप्वा॥अग्नायी॥उलूखलमुसले॥हविर्धाने॥द्यावापृथिव्यौ॥विपाट्छुतुद्र्यौ॥आर्त्नी॥
शुनासीरौ॥देवीजोष्ट्री॥देवीऊर्जाहुती॥३६॥४॥वायुः॥वरुणः॥रुद्रः॥इंद्रः॥पर्जन्यः॥बृहस्पतिः॥ब्रह्मणस्पतिः॥ ११२८
क्षेत्रस्यपतिः॥वास्तोष्पतिः॥वाचस्पतिः॥अपांनपात्॥यमः॥मित्रः॥कः॥सरस्वान्॥विश्वकर्मा॥तार्क्ष्यः॥मन्युः॥दधि
क्राः॥सविता॥त्वष्टा॥वातः॥अग्निः॥वेनः॥असुनीतिः॥ऋतः॥इंदुः॥प्रजापतिः॥अहिः॥अहिर्बुध्न्यः॥सुपर्णः॥पुरू
रवाः॥३२॥५॥श्येनः॥सोमः॥चंद्रमाः॥मृत्युः॥विश्वानरः॥धाता॥विधाता॥मरुतः॥रुद्राः॥ऋभवः॥अंगिरसः॥पितरः॥

अश्विनौ॥उषाः॥श्येनः॥सोमः॥वायुः॥वरुणः॥अश्वः॥शकुनिः॥अग्निः॥जातवेदाः॥ ७८५

अथर्वाणः॥भृगवः॥ऋषयः॥आप्त्याः॥अदितिः॥सरमा॥सरस्वती॥वाक्॥अनुमतिः॥राका॥सिनीवाली॥कुहूः॥यमी॥उ
र्वशी॥पृथिवी॥इंद्राणी॥गौरी॥गौः॥धेनुः॥अघ्न्या॥पथ्यास्वस्तिः॥उषाः॥इळा॥रोदसी॥३१॥६॥अश्विनौ॥उषाः॥सूर्या॥
वृषाकपायी॥सरण्युः॥त्वष्टा॥सविता॥भगः॥सूर्यः॥पूषा॥विष्णुः॥विश्वानरः॥वरुणः॥केशी॥केशिनः॥वृषाकपिः॥य
मः॥अजएकपात्॥पृथिवी॥समुद्रः॥अथर्वा॥मनुः॥दध्यङ्॥आदित्याः॥सप्तऋषयः॥देवाः॥विश्वेदेवाः॥साध्याः॥
वसवः॥वाजिनः॥देवपत्न्यो॥देवपत्न्यः॥३१॥६॥ ॥५॥इतिशिक्षाज्योतिषछंदनिघंटचत्वारियंथाःसमाप्ताः॥
॥ ॥संवत् १८२७वर्षेकार्त्तिकवदि११शुक्रेलिखितमिदं॥ ॥देवेनांनानाइकेनलिखापितं॥देवशंकरनीपोथि
तसहि॥ ॥कल्याणंकरोतुकमलापति॥ ॥यादृशंपुस्तकेदृष्ट्वातादृशंलिखितंमया॥यदिशुद्धमशुद्धंवाममदो
षोनदीयते॥भग्नपृष्टिकटिग्रीवाबद्धमुष्टिरधोमुखं॥कष्टेनलिखितंशास्त्रंयत्नेनपरिपालयेत्॥तैलाद्रक्षेज्जलाद्रक्षे

हेमथ्यजबधनात् । परहस्तगतान्श्चेदेवंवदन्ति [illegible] ॥ पुस्तकेषु इमाफाल्गीकूटे यदि [illegible]रा
मेगाजीमाकु ॥ पुस्तकपाठका ॥ विघ्नहरोस्तु गणेशः देवश्रीरमणीवदने विधत्तु ॥ मंगलमत्र करोतु [illegible] दुर्जि
लेखकपाठकयोः शिवमस्तु ॥ ॥ ग्रंथसंख्या ॥ ३८ ॥ धिः ।

र

दव पोलेर्व

पुस्त

यदादासः ग्नाबणः नो
नविष्वंसुपांते कतांत
इताः तदा मन्मनत
स्वतमोहः

र्क